श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री नारायणदासेन कृतम्

# ॥ श्रीरङ्गरामानुजमहादेशिक (श्रीमुष्णम् आण्डवन्) मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरङ्गरामानुजमहादेशिक (श्रीमुष्णम् आण्डवन्) मङ्गळम् ॥

श्रीमुष्णाभिजनार्याय रङ्गलक्ष्मणयोगिने।
आश्रितावनदीक्षाय नित्यं भवतु मङ्गलम् ॥ 1 ॥

त्रय्यन्तलक्ष्मणमुनेः प्राप्तत्रय्यन्तसम्पदे।
रङ्गलक्ष्मणयोगीन्द्रगुरुवर्याय मङ्गलम् ॥ 2 ॥

नानातन्त्रस्वतन्त्राय नानातत्त्वार्थवेदिने।
नानाभक्तसुसेव्याय तस्मै प्राज्ञाय मङ्गलम् ॥ 3 ॥

अगस्त्यभाषासक्ताय तद्भाषाग्रन्थशोधने।
समर्पितस्वजीवाय गुरुवर्याय मङ्गलम् ॥ 4 ॥

बहुभाषाप्रवीणाय तत्समन्वयकारिणे।
सद्गुणग्राहिणे तस्मै मुनये भवतु मङ्गलम् ॥ 5 ॥

कुरुकेशमुनेस्सूक्तौ द्रामिडीपाशुरेषु च।
कृतभूरिश्रमायास्तु यतिराजाय मङ्गलम् ॥ 6 ॥

भगवद्भाष्यकृत्सूक्तिष्ववगाहितधीमते।
तत्पादाम्बुजरक्ताय योगिवर्याय मङ्गलम् ॥ 7 ॥

वेदान्तदेशिकग्रन्थसारसारज्ञसेविने।
तद्भक्तभक्तभक्तेषु स्वनुरक्ताय मङ्गलम् ॥ 8 ॥

साम्प्रदायिकशास्त्रीयग्रन्थेषु विपुला रतिः।
श्लाघनीया मतिर्यस्य तस्मै भव्याय मङ्गलम्॥ 9॥

गुरुभक्तिप्रपूर्णाय गुरुनामामृताय च।
प्रकाशकाय यशसो ह्याचार्यायास्तु मङ्गलम्॥ 10॥

दया शिष्यजनेष्वेवं वात्सल्यमनुरागता।
सर्वेषु हितता यस्य तस्मै सेव्याय मङ्गलम्॥ 11॥

अनुरागो हि सर्वत्र मानवत्त्वं तथैव च।
दयापूर्णस्सदा योऽसौ गुरवे भवतु मङ्गलम्॥ 12॥

विद्वत्सम्माननं नूनमन्नदानञ्च सर्वदा।
दीनोपकारो येन स्यात् तस्मै भवतु मङ्गलम्॥ 13॥

वेदघोषो ब्रह्मघोषो वैष्णवानां तथैव च।
श्रीपादुकासुघोषश्च यस्यैते तस्य मङ्गलम्॥ 14॥

महावैद्यो महाशिल्पी महागायक एव च।
ज्योतिष्कश्च महायोगी तस्मै श्रेष्ठाय मङ्गलम्॥ 15॥

सम्प्रदायगतिश्चापि सम्प्रदायैकरक्षकः।
श्रीसूक्तिपोषकश्चासौ तस्मै नित्याय मङ्गलम्॥ 16॥

श्रीशठारिर्यतीशानः श्रीमद्वेदान्तदेशिकः।
गोपालार्यगुरुर्वेति तर्क्यमानाय मङ्गलम्॥ 17॥

श्रीनारायणदासेन कृतमाचार्यमङ्गलम्।
ये पठन्ति जनास्तेषां नित्यं भवतु मङ्गलम्॥ 18॥

॥ इति श्रीरङ्गरामानुजमहादेशिक मङ्गळं समाप्तम्॥